# पुष्पगुच्छः

अत्र एकः पुष्पगुच्छो वर्तते। अयं रमणीयः पुष्पगुच्छः। अयं रूपेण नेत्रं गन्धेन घ्राणं च आनन्दयति। पश्य! तस्मिन् एको भृङ्गः तिष्ठति। स पुष्पेभ्यः मकरन्दं पिबति।

भृङ्गाः मकरन्दं पिबन्तः मधुरं गुञ्जन्ति। ते पुष्पात् पुष्पं चलन्तः विहरन्ति। भृङ्गाणां वर्णः नीलः। तेषां भास्वरौ द्वौ पक्षौ विद्येते। तेषां मुखे श्मश्रुणः स्थाने रेफतुल्ये द्वे रोमणी स्तः। अतः ते पश्यतां जनानां विनोदम् आवहन्ति।

भृङ्गाणां समीपं मा गच्छ। ते त्वां दशेयुः। अलं तव कुतूहलेन। आगच्छ, गृहं गच्छावः।